**कौशिज** पु० ब० व० देशभेदे "पञ्चालाः कौशिजाश्चैव नैकपृष्ठाः धुरन्धराः" भा० भी० ६अ० जनपदकथने

**कौशी(षी)धान्य** न० कोशे(षे)भवा कौशी(षी) कर्म्मधा०। कोश(ष)जाते धान्ये तिलादौ । "सर्व्वमेवैतदहः कौशी(षी)धान्यं विवर्ज्जयेत्" कात्या०श्रौ० २।१।१०

**कौशे(षे)य** न० कोशा(षा)दुत्थितम् ढक् । कृमिकोषादिजाते वस्त्रे अमरः "निनाभि कौशे(षे)यमुपात्तरागम्" कुमा० "कौशेयं व्रजदपि गाढतामजस्रम्" माघः "लाक्षालोहितकौशे(षे)यपरिधानम्" कादं० "कौषेयाविकयोरूषै" मनुना तच्छोधनद्रव्यमुक्तम्

**कौश्य** त्रि० कुशस्येदम् ष्यञ् । १कुशसम्बन्धिनि शयनादौ "प्रास्कन्दच्छयने कौश्ये हृष्टात्मा यज्ञमिव प्लवम्" भा० अनु०७१अ०। कुशस्य गोत्रापत्यं वा० ष्यञ् । २कुशगोत्रजे ऋषिभेदे पु० "तं होवाच सुश्रवाः कौश्यः" शत०ब्रा० १०।५।५।४ "कौश्यः कुशगोत्रजः" भा० ; तेन ब्राह्मणे कौषत्र इति मूर्द्धन्ययुक्तपाठस्तु प्रामादिकः ।

**कौशा(सा)रव** पु० कुशा(षा)रोरपत्यम् ऋष्यण् । कुशा(षा)रोर्मुनेरपत्ये मैत्रेये "यावतः कृतवान् प्रश्नान् क्षत्ता कौशारवाग्रतः" भाग०।१३।२ "कौशारवस्य मैत्रेयस्याग्रतः" श्रीधरः "ननु ते तत्त्वमाराध्य ऋषिः कौशारवोऽन्तिमे" भाग० २।४।२ वाह्वा० इञ् । कौशारविरप्यत्र "यत्र कौशारवेस्तस्य संवादोऽध्यात्मसंश्रितः" भाग०२।१०।५२

**कौषिक** त्रि० कौशिक+पृषो० । १कौशिकशब्दार्थे मेदि०२दुर्गामूर्त्तिभेदे स्त्री "शरीरकोषाद्यत्तस्याः पार्वत्याः निःसृताम्बिका । कौषिकीति समाख्याता ततोलोकेषु गीयते" देवीमा० "कायकोषान्निःसृता या कालिकायास्तु भैरव ! । सा कौषिकीति विख्याता चारुरूपा मनोहरा" कालिका० पु० ६०अ०

**कौषीतक** पु० कुषीतकस्यापत्यम् ऋष्यण् । कुषीतकर्षिपुत्रे बह्वृचां प्रत्यहं तर्पणीये ऋषिभेदे कहोडे "कहोडं कौषीतकमित्यादि" आश्व० गृ० ३।४।३।२२ ऋषितर्पणे । कुषीतकस्यापत्यम् इञ् । कौषीतकिरपि कहोड़े ऋषौ "तदुहोवाच कहोड़ः कौषितकिः" शत०ब्रा० २।४।२।१। तत्सम्बन्धित्वात् कौषितकिब्राह्मणं कौषीतकी उपनिषच्च ऋग्वेदान्तर्गता ।

**कौषीतकिन्** पु० ब० व० । कौषीतकेन प्रोक्तमधीयते णिनि । कौषीतकेन प्रोक्ताध्यायिषु । "सदस्यं सप्तदशं कौषीतकिनः समामनन्ति" आश्व०गृ०१।२३।५।

**कौ(षी)तकी** कुषीतकस्यापत्यम् ऋष्यण् ङीप् । अगस्त्यपत्न्यां त्रिका०

**कौषीतकेय** पुंस्त्री कुषीतक+वा० अपत्ये ढक् । कुषीतकस्यापत्ये कहोड़े "अथ हैनं कहोड़ः कौषीतकेयः पप्रच्छ" शत० ब्रा० १४।६।४।१।

**कौष्ठवितक** त्रि० कुष्ठविदि तद्विद्यायां साधु कथ्या० ठक् दस्य चर्त्वेन तान्ततया ठस्य कादेशे । कुष्ठविद्यासाधौ । दस्य चर्त्वाभावमाश्रित्य तान्तत्वाभावेन कौष्ठविदिक इत्यन्ये तन्मतेनैव तथारूपं २१५४पृ० उक्तम्

**कौसीद्य** न०कुत्सितं सीदत्यस्मिन् सीद+वा० आधारे श स्वार्थे ष्यञ् । १आलस्ये २तन्द्रायाञ्च हेम० । कुसीदस्य भावः ष्यञ् । ३वृद्धिरूपकुसीदवृत्तौ शब्दचि०

**कौसुम** न०कुसुमेन निर्वृत्तमण् । १पुष्पाञ्जने अमरः । तस्येदमण् । २पुष्पसम्बन्धिनि त्रि० "विनयति सुदृशो दृशोः परागं प्रणयिनि कौसुममाननानिलेन" माघः

**कौसुम्भ** पु० कुसुम्भ+स्वार्थे अण् । १अरण्यकुसुम्भे २शाकभेदे राजनि० । कुसुम्भेन रक्तम् अण् । ३कुसुम्भरागरञ्जिते वस्त्रादौ त्रि० "कौसुम्भं पृथु कुचकुम्भसङ्गि वासः" माघः । तस्येदमण् । कुसुम्भसम्बन्धिनि त्रि० "दिनकरकरसङ्गव्यक्तकौसुम्भरागम्" माघः । उभयतः स्त्रियां ङीप् ।

**कौसुरुविन्द** पु० दशरात्रसाध्ययागभेदे "कौसुरुविन्दः" कात्या०श्रौ०सू०२३।५।१८। "द्वितीयो दशरात्र एततसंज्ञः" सं०व्या०।प्रायणीययागानन्तरं कौसुरुविन्ददशरात्रस्य२प्रथमेऽहनि च "कौसुरुविन्दः प्रथमन्त्र्यहः" कात्या० २४।२।१

**कौसुरुविन्दि** पु० कुसुरुविन्दस्यापत्यम् इञ् । तदपत्ये उद्दालके मुनौ "कौसुरुविन्दिरुद्दालक आरुणौ ब्रह्मचर्य्यमुवास" शत० ब्रा० १२।२।२।१३। [ जटाध०

**कौसृतिक** त्रि० कुसृत्या चरति ठक् । मायाकारके शाठ्यु-

**कौस्तुभ** पु० कुं भूमिं स्तुभ्नाति कुस्तुभोजलधिः तत्र भवः अण् । विष्णोर्वक्षःस्थे "कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः" इत्युक्तलक्षणे मणिभेदे । तस्य समुद्रादुत्पत्तिकथा हरिवं० २२अ०

"सुरासुरगणाः सर्वे सहिता लवणाम्भसः । मन्दरं पुष्करं कृत्वा नेत्रं वासुकिमेव च । समाः सहस्रं मथितं जलमोषधिभिः सह । क्षीरभूतं समायोगादमृतं समपद्यत ! तज्जह्रुस्सुराः पूर्वमाक्रान्ता लोभमन्युना । तदा पश्चाज्जहुर्देवाः कामतेजोबलान्विताः । धन्वन्तरिस्तथा मद्यं श्रीर्देवी कौस्तुभोमणिः । गजाग्र्यो विमलश्चापि सकुसत्सु ;